गुणं ब्राह्मणमित्यर्थः,यजुर्वेदतरोरासन् शाखा ह्येकोत्तरं शतम्। तत्रापि च शिवाकारा दश पञ्च च वाजिनाम्। "तत्रापि प्रथमा मुख्या शाखेयं काण्वसंज्ञिका" इति ग्रन्थान्तरे। तैत्तिरीयानाम द्विभेदा भवन्ति औख्याः काण्डिकेयाश्चेति। काण्डिकेयानां पञ्च भेदा भवन्ति आपस्तम्बी बौधायनी सत्याषाढी हिरण्यकेशी औधेयी चेति तेषामध्ययनं परिमाणम्। "काण्डास्तु सप्त विज्ञेया प्रश्नाश्च चतुरुत्तराः। चत्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट्। एकपञ्चाशदधिका संख्या पञ्चाशयोच्यते। द्विसहस्रञ्चैकशतमष्टानवतिकाधिकम्। लक्षैकन्तु द्विनवतिः सहस्राणि प्रकीर्त्तितम्। पदानि नवतिश्चैव तथाक्षरन्तदुच्यते। लक्षद्वयं त्रिपञ्चाशत् सहस्राणि शताष्टकम्। अष्टषष्ठ्यधिकं चैव यजुर्वेदप्रमाणकम्"। काण्डाः ७। प्रश्नाः १४४। अनुवाकाः६५१। पञ्चाशी २१९८। पदानि१९२०९०। अक्षरसंख्या २५३८६८। इति शाखावाक्यान्ययुतानि सहस्राणि नवानि च। चतुःशतान्यशीतिश्च अष्टौ वाक्यानि गण्यते तत्र इति ब्राह्मणे वाक्यसंख्या१९४८०तैत्तिरीयनिगदवेदाख्यसंख्या उक्ता इत्यर्थः। तत्र कठानां तु प्रगाथचतुश्चत्वारिंशदुपग्रन्थाः। मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते। यजुर्वेदः स विज्ञेयो अन्ये शाखान्तराः स्मृताः" चतुश्चत्वारिंशदुपग्रन्थाः मन्त्रब्राह्मणयोर्वेदस्य अध्याय समीपे उक्ताः चतुश्चत्वारिंशत्। मन्त्रश्च ब्राह्मणं च मन्त्रब्राह्मणे तयोः मन्त्रब्राह्मणयोः तयोश्च वेद इति संज्ञा तदुक्तं "मन्त्रब्राह्मणयोर्वेद" इति नामधेयमित्यृक्शाखीयप्रातिशाख्याभाष्यकारेण, आपस्तम्बसामान्यसूत्रभाष्यकारकपर्दिना धूर्त्तस्वामिना च। तथाच सति मन्त्रोनाम संहितामन्त्रस्तादृङ्मन्त्ररूपसंहितायाः मध्ये एव तदग्रे ब्राह्मणत्वेन पठनमित्युभयथापि संहितात्वेन पदत्वेन क्रमत्वेन च पठनं त्रिगुणपठनमिति समन्त्रब्राह्मणयोर्वेदस्त्रिगुणो यत्र पठ्यते इत्यर्थः एतादृशं पठनं शाखाया अध्ययनं स यजुर्वेदस्तच्च तैत्तिरीयशाखायामेवास्ति" भाष्यम्। अयमत्र शाखाभेदसंख्यानिर्णयः। चरकादिकानां द्वादशानां प्रत्येकं मानवादि सप्तभेदैर्गुणितानां ८४संख्या सम्पद्यते तैत्तिरीयस्य द्वौ भेदौ एवं षडशीतिसंख्या वाजसनेयसंख्या पञ्चदशेति एकोत्तरशतसंख्या। अतएवमुक्तिकोपनिषदि "एकोत्तर शतं चैव यजुःशाखाः प्रकीर्त्तिताः" इत्युक्तम् दर्शितविष्णुपु० सप्तविंशतिभेदोक्तिः चरकादिद्वादशभेदाः काण्वादि पञ्चदशभेदाश्चेति मुख्यभेदाभिप्रायेणेति न विरोधः। कृष्णयजुर्वेदगतोपनिषदश्च उपनिषच्छब्दे दर्शिताः

**कृष्णयाम** पु० कृष्णोयामोवर्त्म यस्य। वह्नौ। "दृश्चद्वनं कृष्णयामम्" ऋ० ६,६,१, "कृष्णयामं कृष्णवर्त्मानम्" भा०

**कृष्णरक्त** पु० वर्णोवर्णेनेति" पा० स०। १काललोहितवर्णे (वेगुनीरङ्) २तद्वति त्रि०। [राजनि०

**कृष्णरुहा** स्त्री कृष्णा सती रोहति रुह—क। जतुकायां

**कृष्णरूप्य** त्रि०कृष्णस्य भूतपूर्वःरूप्य। तदीयभूतपूर्वसम्बन्धिनि। कृष्णाया इत्यर्थे न पुंवत्। कृष्णारूप्य इति भेदः

**कृष्णल** पु०कृष्णोवर्णोऽस्त्यस्याग्रे फले सिध्मा० लच्। गुञ्जावृक्षे शब्दचि०तत्रार्थे स्त्री अमरः२तत्फले न०। "द्वे कृष्णले पलष्टते विज्ञेयोमध्यमोयवः" मनुः। "त्रियवं त्वेककृष्णलम्"। "स दण्ड्यः कृष्णलान्यष्टौ" मनुः। "जालसूर्य्यमरीचिस्थं त्रसरेणु रजः स्मृतम्। तेऽष्टौ लिक्षा, तु तास्तिस्रोराजसर्षप उच्यते। गौरस्तु ते त्रयः, षट् ते यवोमध्यस्तु, ते त्रयः। कृष्णलः, पञ्च ते माषः" इति याज्ञ०परिभाषिते ३परिमाणभेदे पु०स्वार्थे क। तत्रार्थे "पञ्चकृष्णलकोमाषः" मनुः अत्र पञ्च कृष्णलाःपरिमाणमस्येति कन्। इति तु न्याय्यम्

**कृष्णलवण** न० नित्यकर्म्म०। सौवर्चललवणे (कालालोन) राजनि० काचलवणशब्दे १८५६पृ० विवृतिः।

**कृष्णलोह** नित्यक०। अयस्कान्ते लौहभेदे राजनि०।

**कृष्णलोहित** पु०कृष्णः सन् लोहितः"वर्णोवर्णेनेति"पा०स०। १रक्तकालमिश्रितवर्णे धूम्रले (वेगुनीरङ)। २तद्वति त्रि० अमरः।

**कृष्णवक्त्र** पुंस्त्री०कृष्णं वक्त्रमस्य। वानरे हलायुधः संयोगोपधत्वात् जातित्वेऽपि स्त्रियां टाप्। कृष्णवदनादयोऽप्यत्र

**कृष्णवर्ण** पु० कृष्णो वर्णोऽस्य। १राहौ ग्रहे। राहोः छायारूपत्वेन तमोरूपत्वात् तथात्वारोपात् तथात्वम्। कृष्णः अशुक्लो वर्णः। २शूद्रे पु०। कर्म्म०। काले वर्णे पु० कृष्णवर्णवति त्रि०। "कृष्णवर्णं त्विषाऽकृष्णम्" भागव० ११स्क०।

**कृष्णवर्त्मन्** पु० कृष्णं वर्त्म धूमप्रसाररूपगतिस्थानमस्य। १वह्नौ, "हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" मनुः पातयामास विहगान् प्रदीप्ते कृष्णवर्त्मनि" भा० आ० २२६अ०। २चित्रकवृक्षे अमरः ३राहौ ग्रहे, मेदि०। कृष्णमपवित्रं वर्त्माचरणं यस्य। ४दुष्टकर्म्मकारके त्रि० अमरः कृष्णएव वर्त्म। ५वासुदेवरूपगतौ। "कृष्णवर्त्मनि गुणान् गणयन्ती जीवनेषु लघयन्त्यनुरागम्। आमता